# Shri Saketanivasacharyapranitam Tattvatrayam

# શ્રીસાકેતનિવાસાચાર્યપ્રણીતં તત્ત્વત્રયમ્

## Document Information

Text title : Shri Saketanivasacharyapranitam Tattvatrayam

File name : tattvatrayamsAketanivAsAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : sAketanivAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીસાકેતનિવાસાચાર્યપ્રણીતં તત્ત્વત્રયમ્

(ટીલાચાર્ય)

મુક્તામુક્તવિભેદતો દ્વિવિધતાં યાતા વિભિન્નાઃ મિથો
બોદ્ધારઃ સુખબુદ્ધિરૂપકૃતભુઙ્નિત્યા અચિન્ત્યાણવકઃ ।
દાસકાઙ્ક્ષિતવસ્તુદક્ષિતિસુતાનાથસ્ય દાસાસ્તથા
પ્રજ્ઞાપ્રાણશરીરતઃ કરણતો ભિન્નાઃ સમે પ્રાણિનઃ ॥ ૧॥

સત્વાદ્યાયતનં વિકારકરણી નિત્યા તથાઽચેતના
બદ્ધાનાં સુખબુદ્ધિહૃદ્ રઘુવરાધીના જગત્સર્જને ।
માયાખ્યા પ્રકૃતિઃ સતી વિકતિભૃદ્ યસ્યાઃ પરેશેચ્છયા
મૂલાદ્યા નિગમાન્તવિન્નિગદિતા ભેદાશ્ચતુર્વિંશતિઃ ॥ ૨॥

ધ્યેયો દિવ્યતનુસ્તથા શુભગુણામ્ભોધિર્જગત્કારણં
ચિદ્ રવ્યાદિવિભાસકઃ શ્રુતિમતો ભક્ત્યૈવ મુક્તિપ્રદઃ ।
નિત્યો બ્રહ્મશિવાર્ચિતશ્ચ ચિદચિચ્છેષી પરેશો વિભુઃ
સર્વજ્ઞઃ પ્રણતાર્તિહૃદ્ રઘુવરઃ શ્રીશોઽવતારી સ્વરાટ્ ॥ ૩॥

ઈશિત્રી જગતોઽસ્ય વિશ્વજનની લાવણ્યવારાન્નિધિ-
ર્વાત્સલ્યાદિગુણાવિધિઃ શ્રિતજનાભીષ્ટાર્થદા સર્વવિત્ ।
ધ્યેયા સજ્જગદીશિતૂ રઘુપતેર્વિમ્વી પ્રિયા જાનકી
યત્કારુણ્યદિદૃક્ષુણા ભગવતા સર્વં જગત્ સૃજ્યતે ॥ ૪॥

ઇતિ શ્રીસાકેતનિવાસાચાર્યપ્રણીતં તત્ત્વત્રયં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*